# Anugita

# અનુગીતા

## Document Information

Text title : anugItA

File name : anugiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Proofread by : Sunder Hattangadi, PSA Easwaran

Description-comments : Adhyaya numbers 16-19 in Ashvamedhika, Mahabharata

Acknowledge-Permission: Professor Tokunaga

Latest update : June 2, 1998, December 30, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 30, 2022

*sanskritdocuments.org*

# અનુગીતા

મહાભારતે આશ્વમેધિકાધ્યાયાન્તર્ગતા

## અધ્યાયઃ ૧૬

જનમેજય ઉવાચ
સભાયાં વસતોસ્તસ્યાં નિહત્યારીન્મહાત્મનોઃ ।
કેશવાર્જુનયોઃ કા નુ કથા સમભવદ્દ્વિજ ॥ ૧॥

વૈશમ્પાયન ઉવાચ
કૃષ્ણેન સહિતઃ પાર્થઃ સ્વરાજ્યં પ્રાપ્ય કેવલમ્ ।
તસ્યાં સભાયાં રમ્યાયાં વિજહાર મુદા યુતઃ ॥ ૨॥

તતઃ કશ્ચિત્સભોદ્દેશં સ્વર્ગોદ્દેશસમં નૃપ ।
યદૃચ્છયા તૌ મુદિતૌ જગ્મતુઃ સ્વજનાવૃતૌ ॥ ૩॥

તતઃ પ્રતીતઃ કૃષ્ણેન સહિતઃ પાણ્ડવોઽર્જુનઃ ।
નિરીક્ષ્ય તાં સભાં રમ્યામિદં વચનમબ્રવીત્ ॥ ૪॥

વિદિતં તે મહાબાહો સઙ્ગ્રામે સમુપસ્થિતે ।
માહાત્મ્યં દેવકીમાતસ્તચ્ચ તે રૂપમૈશ્વરમ્ ॥ ૫॥

યત્તુ તદ્ભવતા પ્રોક્તં તદા કેશવ સૌહૃદાત્ ।
તત્સર્વં પુરુષવ્યાઘ્ર નષ્ટં મે નષ્ટચેતસઃ ॥ ૬॥

મમ કૌતૂહલં ત્વસ્તિ તેષ્વર્થેષુ પુનઃ પ્રભો ।
ભવાંશ્ચ દ્વારકાં ગન્તા નચિરાદિવ માધવ ॥ ૭॥

વૈશમ્પાયન ઉવાચ
એવમુક્તસ્તતઃ કૃષ્ણઃ ફલ્ગુનં પ્રત્યભાષત ।
પરિષ્વજ્ય મહાતેજા વચનં વદતાં વરઃ ॥ ૮॥

વાસુદેવ ઉવાચ
શ્રાવિતસ્ત્વં મયા ગુહ્યં જ્ઞાપિતશ્ચ સનાતનમ્ ।
ધર્મં સ્વરૂપિણં પાર્થ સર્વલોકાંશ્ચ શાશ્વતાન્ ॥ ૯॥

અબુદ્ધ્વા યન્ન ગૃહ્ણીથાસ્તન્મે સુમહદપ્રિયમ્ ।
નૂનમશ્રદ્દધાનોઽસિ દુર્મેધાશ્ચાસિ પાણ્ડવ ॥ ૧૦॥

સ હિ ધર્મઃ સુપર્યાપ્તો બ્રહ્મણઃ પદવેદને ।
ન શક્યં તન્મયા ભૂયસ્તથા વક્તુમશેષતઃ ॥ ૧૧॥

પરં હિ બ્રહ્મ કથિતં યોગયુક્તેન તન્મયા ।
ઇતિહાસં તુ વક્ષ્યામિ તસ્મિન્નર્થે પુરાતનમ્ ॥ ૧૨॥

યથા તાં બુદ્ધિમાસ્થાય ગતિમગ્ર્યાં ગમિષ્યસિ ।
શ઼ૃણુ ધર્મભૃતાં શ્રેષ્ઠ ગદતઃ સર્વમેવ મે ॥ ૧૩॥

આગચ્છદ્બ્રાહ્મણઃ કશ્ચિત્સ્વર્ગલોકાદરિન્દમ ।
બ્રહ્મલોકાચ્ચ દુર્ધર્ષઃ સોઽસ્માભિઃ પૂજિતોઽભવત્ ॥ ૧૪॥

અસ્માભિઃ પરિપૃષ્ટશ્ચ યદાહ ભરતર્ષભ ।
દિવ્યેન વિધિના પાર્થ તચ્છૃણુષ્વાવિચારયન્ ॥ ૧૫॥

બ્રાહ્મણ ઉવાચ
મોક્ષધર્મં સમાશ્રિત્ય કૃષ્ણ યન્માનુપૃચ્છસિ ।
ભૂતાનામનુકમ્પાર્થં યન્મોહચ્છેદનં પ્રભો ॥ ૧૬॥

તત્તેઽહં સમ્પ્રવક્ષ્યામિ યથાવન્મધુસૂદન ।
શ઼ૃણુષ્વાવહિતો ભૂત્વા ગદતો મમ માધવ ॥ ૧૭॥

કશ્ચિદ્વિપ્રસ્તપો યુક્તઃ કાશ્યપો ધર્મવિત્તમઃ ।
આસસાદ દ્વિજં કઞ્ચિદ્ધર્માણામાગતાગમમ્ ॥ ૧૮॥

ગતાગતે સુબહુશો જ્ઞાનવિજ્ઞાનપારગમ્ ।
લોકતત્ત્વાર્થકુશલં જ્ઞાતારં સુખદુઃખયોઃ ॥ ૧૯॥

જાતિસ્મરણતત્ત્વજ્ઞં કોવિદં પુણ્યપાપયોઃ ।
દ્રષ્ટારમુચ્ચનીચાનાં કર્મભિર્દેહિનાં ગતિમ્ ॥ ૨૦॥

ચરન્તં મુક્તવત્સિદ્ધં પ્રશાન્તં સંયતેન્દ્રિયમ્ ।
દીપ્યમાનં શ્રિયા બ્રાહ્મ્યા ક્રમમાણં ચ સર્વશઃ ॥ ૨૧॥

અન્તર્ધાનગતિજ્ઞં ચ શ્રુત્વા તત્ત્વેન કાશ્યપઃ ।
તથૈવાન્તર્હિતૈઃ સિદ્ધૈર્યાન્તં ચક્રધરૈઃ સહ ॥ ૨૨॥

સમ્ભાષમાણમેકાન્તે સમાસીનં ચ તૈઃ સહ ।
યદૃચ્છયા ચ ગચ્છન્તમસક્તં પવનં યથા ॥ ૨૩॥

તં સમાસાદ્ય મેધાવી સ તદા દ્વિજસત્તમઃ ।
ચરણૌ ધર્મકામો વૈ તપસ્વી સુસમાહિતઃ ।
પ્રતિપેદે યથાન્યાયં ભક્ત્યા પરમયા યુતઃ ॥ ૨૪॥

વિસ્મિતશ્ચાદ્ભુતં દૃષ્ટ્વા કાશ્યપસ્તં દ્વિજોત્તમમ્ ।
પરિચારેણ મહતા ગુરું વૈદ્યમતોષયત્ ॥ ૨૫॥

પ્રીતાત્મા ચોપપન્નશ્ચ શ્રુતચારિત્રસંયુતમ્ ।
ભાવેન તોષયચ્ચૈનં ગુરુવૃત્ત્યા પરન્તપઃ ॥ ૨૬॥

તસ્મૈ તુષ્ટઃ સ શિષ્યાય પ્રસન્નોઽથાબ્રવીદ્ગુરુઃ ।
સિદ્ધિં પરામભિપ્રેક્ષ્ય શ‍ૃણુ તન્મે જનાર્દન ॥ ૨૭॥

સિદ્ધ ઉવાચ
વિવિધૈઃ કર્મભિસ્તાત પુણ્યયોગૈશ્ચ કેવલૈઃ ।
ગચ્છન્તીહ ગતિં મર્ત્યા દેવલોકેઽપિ ચ સ્થિતિમ્ ॥ ૨૮॥

ન ક્વચિત્સુખમત્યન્તં ન ક્વચિચ્છાશ્વતી સ્થિતિઃ ।
સ્થાનાચ્ચ મહતો ભ્રંશો દુઃખલબ્ધાત્પુનઃ પુનઃ ॥ ૨૯॥

અશુભા ગતયઃ પ્રાપ્તાઃ કષ્ટા મે પાપસેવનાત્ ।
કામમન્યુપરીતેન તૃષ્ણયા મોહિતેન ચ ॥ ૩૦॥

પુનઃ પુનશ્ચ મરણં જન્મ ચૈવ પુનઃ પુનઃ ।
આહારા વિવિધા ભુક્તાઃ પીતા નાનાવિધાઃ સ્તનાઃ ॥ ૩૧॥

માતરો વિવિધા દૃષ્ટાઃ પિતરશ્ચ પૃથગ્વિધાઃ ।
સુખાનિ ચ વિચિત્રાણિ દુઃખાનિ ચ મયાનઘ ॥ ૩૨॥

પ્રિયૈર્વિવાસો બહુશઃ સંવાસશ્ચાપ્રિયૈઃ સહ ।
ધનનાશશ્ચ સમ્પ્રાપ્તો લબ્ધ્વા દુઃખેન તદ્ધનમ્ ॥ ૩૩॥

અવમાનાઃ સુકષ્ટાશ્ચ પરતઃ સ્વજનાત્તથા ।
શારીરા માનસાશ્ચાપિ વેદના ભૃશદારુણાઃ ॥ ૩૪॥

પ્રાપ્તા વિમાનનાશ્ચોગ્રા વધબન્ધાશ્ચ દારુણાઃ ।
પતનં નિરયે ચૈવ યાતનાશ્ચ યમક્ષયે ॥ ૩૫॥

જરા રોગાશ્ચ સતતં વાસનાનિ ચ ભૂરિશઃ ।
લોકેઽસ્મિન્નનુભૂતાનિ દ્વન્દ્વજાનિ ભૃશં મયા ॥ ૩૬॥

તતઃ કદાચિન્નિર્વેદાન્નિકારાન્નિકૃતેન ચ ।
લોકતન્ત્રં પરિત્યક્તં દુઃખાર્તેન ભૃશં મયા ।
તતઃ સિદ્ધિરિયં પ્રાપ્તા પ્રસાદાદાત્મનો મયા ॥ ૩૭॥

નાહં પુનરિહાગન્તા લોકાનાલોકયામ્યહમ્ ।
આ સિદ્ધેરા પ્રજાસર્ગાદાત્મનો મે ગતિઃ શુભા ॥ ૩૮॥

ઉપલબ્ધા દ્વિજશ્રેષ્ઠ તથેયં સિદ્ધિરુત્તમા ।
ઇતઃ પરં ગમિષ્યામિ તતઃ પરતરં પુનઃ ।
બ્રહ્મણઃ પદમવ્યગ્રં મા તેઽભૂદત્ર સંશયઃ ॥ ૩૯॥

નાહં પુનરિહાગન્તા મર્ત્યલોકે પરન્તપ ।
પ્રીતોઽસ્મિ તે મહાપ્રાજ્ઞ બ્રૂહિ કિં કરવાણિ તે ॥ ૪૦॥

યદીપ્સુરુપપન્નસ્ત્વં તસ્ય કાલોઽયમાગતઃ ।
અભિજાને ચ તદહં યદર્થં મામુપાગતઃ ।
અચિરાત્તુ ગમિષ્યામિ યેનાહં ત્વામચૂચુદમ્ ॥ ૪૧॥

ભૃશં પ્રીતોઽસ્મિ ભવતશ્ચારિત્રેણ વિચક્ષણ ।
પરિપૃચ્છ યાવદ્ભવતે ભાષે યદ્યત્તવેપ્સિતમ્ ॥ ૪૨॥

બહુ મન્યે ચ તે બુદ્ધિં ભૃશં સમ્પૂજયામિ ચ ।
યેનાહં ભવતા બુદ્ધો મેધાવી હ્યસિ કાશ્યપ ॥ ૪૩॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ સપ્તદશોઽધ્યાયઃ ॥

## અધ્યાયઃ ૧૭

વાસુદેવ ઉવાચ
તતસ્તસ્યોપસઙ્ગૃહ્ય પાદૌ પ્રશ્નાન્સુદુર્વચાન્ ।
પપ્રચ્છ તાંશ્ચ સર્વાન્સ પ્રાહ ધર્મભૃતાં વરઃ ॥ ૧॥

કાશ્યપ ઉવાચ

કથં શરીરં ચ્યવતે કથં ચૈવોપપદ્યતે ।
કથં કષ્ટાચ્ચ સંસારાત્સંસરન્પરિમુચ્યતે ॥ ૨॥

આત્માનં વા કથં યુક્ત્વા તચ્છરીરં વિમુઞ્ચતિ ।
શરીરતશ્ચ નિર્મુક્તઃ કથમન્યત્પ્રપદ્યતે ॥ ૩॥

કથં શુભાશુભે ચાયં કર્મણી સ્વકૃતે નરઃ ।
ઉપભુઙ્ક્તે ક્વ વા કર્મ વિદેહસ્યોપતિષ્ઠતિ ॥ ૪॥

બ્રાહ્મણ ઉવાચ
એવં સઞ્ચોદિતઃ સિદ્ધઃ પ્રશ્નાંસ્તાન્પ્રત્યભાષત ।
આનુપૂર્વ્યેણ વાર્ષ્ણેય યથા તન્મે વચઃ શ‍ૃણુ ॥ ૫॥

સિદ્ધ ઉવાચ
આયુઃ કીર્તિકરાણીહ યાનિ કર્માણિ સેવતે ।
શરીરગ્રહણેઽન્યસ્મિંસ્તેષુ ક્ષીણેષુ સર્વશઃ ॥ ૬॥

આયુઃ ક્ષયપરીતાત્મા વિપરીતાનિ સેવતે ।
બુદ્ધિર્વ્યાવર્તતે ચાસ્ય વિનાશે પ્રત્યુપસ્થિતે ॥ ૭॥

સત્ત્વં બલં ચ કાલં ચાપ્યવિદિત્વાત્મનસ્તથા ।
અતિવેલમુપાશ્નાતિ તૈર્વિરુદ્ધાન્યનાત્મવાન્ ॥ ૮॥

યદાયમતિકષ્ટાનિ સર્વાણ્યુપનિષેવતે ।
અત્યર્થમપિ વા ભુઙ્ક્તે ન વા ભુઙ્ક્તે કદાચન ॥ ૯॥

દુષ્ટાન્નં વિષમાન્નં ચ સોઽન્યોન્યેન વિરોધિ ચ ।
ગુરુ વાપિ સમં ભુઙ્ક્તે નાતિજીર્ણેઽપિ વા પુનઃ ॥ ૧૦॥

વ્યાયામમતિમાત્રં વા વ્યવાયં ચોપસેવતે ।
સતતં કર્મ લોભાદ્વા પ્રાપ્તં વેગવિધારણમ્ ॥ ૧૧॥

રસાતિયુક્તમન્નં વા દિવાસ્વપ્નં નિષેવતે ।
અપક્વાનાગતે કાલે સ્વયં દોષાન્પ્રકોપયન્ ॥ ૧૨॥

સ્વદોષકોપનાદ્રોગં લભતે મરણાન્તિકમ્ ।
અથ ચોદ્બન્ધનાદીનિ પરીતાનિ વ્યવસ્યતિ ॥ ૧૩॥

તસ્ય તૈઃ કારણૈર્જન્તોઃ શરીરાચ્ચ્યવતે યથા ।
જીવિતં પ્રોચ્યમાનં તદ્યથાવદુપધારય ॥ ૧૪॥

ઊષ્મા પ્રકુપિતઃ કાયે તીવ્રવાયુસમીરિતઃ ।
શરીરમનુપર્યેતિ સર્વાન્પ્રાણાન્ રુણદ્ધિ વૈ ॥ ૧૫॥

અત્યર્થં બલવાનૂષ્મા શરીરે પરિકોપિતઃ ।
ભિનત્તિ જીવસ્થાનાનિ તાનિ મર્માણિ વિદ્ધિ ચ ॥ ૧૬॥

તતઃ સવેદનઃ સદ્યો જીવઃ પ્રચ્યવતે ક્ષરન્ ।
શરીરં ત્યજતે જન્તુશ્છિદ્યમાનેષુ મર્મસુ ।
વેદનાભિઃ પરીતાત્મા તદ્વિદ્ધિ દ્વિજસત્તમ ॥ ૧૭॥

જનીમરણસંવિગ્નાઃ સતતં સર્વજન્તવઃ ।
દૃશ્યન્તે સન્ત્યજન્તશ્ચ શરીરાણિ દ્વિજર્ષભ ॥ ૧૮॥

ગર્ભસઙ્ક્રમણે ચાપિ મર્મણામતિસર્પણે ।
તાદૃશીમેવ લભતે વેદનાં માનવઃ પુનઃ ॥ ૧૯॥

ભિન્નસન્ધિરથ ક્લેદમદ્ભિઃ સ લભતે નરઃ ।
યથા પઞ્ચસુ ભૂતેષુ સંશ્રિતત્વં નિગચ્છતિ ।
શૈત્યાત્પ્રકુપિતઃ કાયે તીવ્રવાયુસમીરિતઃ ॥ ૨૦॥

યઃ સ પઞ્ચસુ ભૂતેષુ પ્રાણાપાને વ્યવસ્થિતઃ ।
સ ગચ્છત્યૂર્ધ્વગો વાયુઃ કૃચ્છ્રાન્મુક્ત્વા શરીરિણમ્ ॥ ૨૧॥

શરીરં ચ જહાત્યેવ નિરુચ્છ્વાસશ્ચ દૃશ્યતે ।
નિરૂષ્મા સ નિરુચ્છ્વાસો નિઃશ્રીકો ગતચેતનઃ ॥ ૨૨॥

બ્રહ્મણા સમ્પરિત્યક્તો મૃત ઇત્યુચ્યતે નરઃ ।
સ્રોતોભિર્યૈર્વિજાનાતિ ઇન્દ્રિયાર્થાઞ્શરીરભૃત્ ।
તૈરેવ ન વિજાનાતિ પ્રાણમાહારસમ્ભવમ્ ॥ ૨૩॥

તત્રૈવ કુરુતે કાયે યઃ સ જીવઃ સનાતનઃ ।
તેષાં યદ્યદ્ભવેદ્યુક્તં સન્નિપાતે ક્વચિત્ક્વચિત્ ।
તત્તન્મર્મ વિજાનીહિ શાસ્ત્રદૃષ્ટં હિ તત્તથા ॥ ૨૪॥

તેષુ મર્મસુ ભિન્નેષુ તતઃ સ સમુદીરયન્ ।
આવિશ્ય હૃદયં જન્તોઃ સત્ત્વં ચાશુ રુણદ્ધિ વૈ ।
તતઃ સ ચેતનો જન્તુર્નાભિજાનાતિ કિઞ્ચન ॥ ૨૫॥

તમસા સંવૃતજ્ઞાનઃ સંવૃતેષ્વથ મર્મસુ ।

સ જીવો નિરધિષ્ઠાનશ્ચાલ્યતે માતરિશ્વના ॥ ૨૬॥

તતઃ સ તં મહોચ્છ્વાસં ભૃશમુચ્છ્વસ્ય દારુણમ્ ।
નિષ્ક્રામન્કમ્પયત્યાશુ તચ્છરીરમચેતનમ્ ॥ ૨૭॥

સ જીવઃ પ્રચ્યુતઃ કાયાત્કર્મભિઃ સ્વૈઃ સમાવૃતઃ ।
અઙ્કિતઃ સ્વૈઃ શુભૈઃ પુણ્યૈઃ પાપૈર્વાપ્યુપપદ્યતે ॥ ૨૮॥

બ્રાહ્મણા જ્ઞાનસમ્પન્ના યથાવચ્છ્રુતનિશ્ચયાઃ ।
ઇતરં કૃતપુણ્યં વા તં વિજાનન્તિ લક્ષણૈઃ ॥ ૨૯॥

યથાન્ધકારે ખદ્યોતં લીયમાનં તતસ્તતઃ ।
ચક્ષુષ્મન્તઃ પ્રપશ્યન્તિ તથા તં જ્ઞાનચક્ષુષઃ ॥ ૩૦॥

પશ્યન્ત્યેવંવિધાઃ સિદ્ધા જીવં દિવ્યેન ચક્ષુષા ।
ચ્યવન્તં જાયમાનં ચ યોનિં ચાનુપ્રવેશિતમ્ ॥ ૩૧॥

તસ્ય સ્થાનાનિ દૃષ્ટાનિ ત્રિવિધાનીહ શાસ્ત્રતઃ ।
કર્મભૂમિરિયં ભૂમિર્યત્ર તિષ્ઠન્તિ જન્તવઃ ॥ ૩૨॥

તતઃ શુભાશુભં કૃત્વા લભન્તે સર્વદેહિનઃ ।
ઇહૈવોચ્ચાવચાન્ભોગાન્પ્રાપ્નુવન્તિ સ્વકર્મભિઃ ॥ ૩૩॥

ઇહૈવાશુભકર્મા તુ કર્મભિર્નિરયં ગતઃ ।
અવાક્સ નિરયે પાપો માનવઃ પચ્યતે ભૃશમ્ ।
તસ્માત્સુદુર્લભો મોક્ષ આત્મા રક્ષ્યો ભૃશં તતઃ ॥ ૩૪॥

ઊર્ધ્વં તુ જન્તવો ગત્વા યેષુ સ્થાનેષ્વવસ્થિતાઃ ।
કીર્ત્યમાનાનિ તાનીહ તત્ત્વતઃ સન્નિબોધ મે ।
તચ્છ્રુત્વા નૈષ્ઠિકીં બુદ્ધિં બુધ્યેથાઃ કર્મનિશ્ચયાત્ ॥ ૩૫॥

તારા રૂપાણિ સર્વાણિ યચ્ચૈતચ્ચન્દ્રમણ્ડલમ્ ।
યચ્ચ વિભ્રાજતે લોકે સ્વભાસા સૂર્યમણ્ડલમ્ ।
સ્થાનાન્યેતાનિ જાનીહિ નરાણાં પુણ્યકર્મણામ્ ॥ ૩૬॥

કર્મક્ષયાચ્ચ તે સર્વે ચ્યવન્તે વૈ પુનઃ પુનઃ ।
તત્રાપિ ચ વિશેષોઽસ્તિ દિવિ નીચોચ્ચમધ્યમઃ ॥ ૩૭॥

ન તત્રાપ્યસ્તિ સન્તોષો દૃષ્ટ્વા દીપ્તતરાં શ્રિયમ્ ।
ઇત્યેતા ગતયઃ સર્વાઃ પૃથક્ત્વે સમુદીરિતાઃ ॥ ૩૮॥

ઉપપત્તિં તુ ગર્ભસ્ય વક્ષ્યામ્યહમતઃપરમ્ ।
યથાવત્તાં નિગદતઃ શ‍ૃણુષ્વાવહિતો દ્વિજ ॥ ૩૯॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ અષ્ટાદશોઽધ્યાયઃ ॥

## અધ્યાયઃ ૧૮

બ્રાહ્મણ ઉવાચ
શુભાનામશુભાનાં ચ નેહ નાશોઽસ્તિ કર્મણામ્ ।
પ્રાપ્ય પ્રાપ્ય તુ પચ્યન્તે ક્ષેત્રં ક્ષેત્રં તથા તથા ॥ ૧॥

યથા પ્રસૂયમાનસ્તુ ફલી દદ્યાત્ફલં બહુ ।
તથા સ્યાદ્વિપુલં પુણ્યં શુદ્ધેન મનસા કૃતમ્ ॥ ૨॥

પાપં ચાપિ તથૈવ સ્યાત્પાપેન મનસા કૃતમ્ ।
પુરોધાય મનો હીહ કર્મણ્યાત્મા પ્રવર્તતે ॥ ૩॥

યથા કર્મસમાવિષ્ટઃ કામમન્યુસમાવૃતઃ ।
નરો ગર્ભં પ્રવિશતિ તચ્ચાપિ શ‍ૃણુ ચોત્તરમ્ ॥ ૪॥

શુક્રં શોણિતસંસૃષ્ટં સ્ત્રિયા ગર્ભાશયં ગતમ્ ।
ક્ષેત્રં કર્મજમાપ્નોતિ શુભં વા યદિ વાશુભમ્ ॥ ૫॥

સૌક્ષ્મ્યાદવ્યક્તભાવાચ્ચ ન સ ક્વચન સજ્જતે ।
સમ્પ્રાપ્ય બ્રહ્મણઃ કાયં તસ્માત્તદ્બ્રહ્મ શાશ્વતમ્ ।
તદ્બીજં સર્વભૂતાનાં તેન જીવન્તિ જન્તવઃ ॥ ૬॥

સ જીવઃ સર્વગાત્રાણિ ગર્ભમાવિશ્ય ભાગશઃ ।
દધાતિ ચેતસા સદ્યઃ પ્રાણસ્થાનેષ્વવસ્થિતઃ ।
તતઃ સ્પન્દયતેઽઙ્ગાનિ સ ગર્ભશ્ચેતનાન્વિતઃ ॥ ૭॥

યથા હિ લોહનિષ્યન્દો નિષિક્તો બિમ્બવિગ્રહમ્ ।
ઉપૈતિ તદ્વજ્જાનીહિ ગર્ભે જીવપ્રવેશનમ્ ॥ ૮॥

લોહપિણ્ડં યથા વહ્નિઃ પ્રવિશત્યભિતાપયન્ ।
તથા ત્વમપિ જાનીહિ ગર્ભે જીવોપપાદનમ્ ॥ ૯॥

યથા ચ દીપઃ શરણં દીપ્યમાનઃ પ્રકાશયેત્ ।
એવમેવ શરીરાણિ પ્રકાશયતિ ચેતના ॥ ૧૦॥

યદ્યચ્ચ કુરુતે કર્મ શુભં વા યદિ વાશુભમ્ ।
પૂર્વદેહકૃતં સર્વમવશ્યમુપભુજ્યતે ॥ ૧૧॥

તતસ્તત્ક્ષીયતે ચૈવ પુનશ્ચાન્યત્પ્રચીયતે ।
યાવત્તન્મોક્ષયોગસ્થં ધર્મં નૈવાવબુધ્યતે ॥ ૧૨॥

તત્ર ધર્મં પ્રવક્ષ્યામિ સુખી ભવતિ યેન વૈ ।
આવર્તમાનો જાતીષુ તથાન્યોન્યાસુ સત્તમ ॥ ૧૩॥

દાનં વ્રતં બ્રહ્મચર્યં યથોક્તવ્રતધારણમ્ ।
દમઃ પ્રશાન્તતા ચૈવ ભૂતાનાં ચાનુકમ્પનમ્ ॥ ૧૪॥

સંયમશ્ચાનૃશંસ્યં ચ પરસ્વાદાનવર્જનમ્ ।
વ્યલીકાનામકરણં ભૂતાનાં યત્ર સા ભુવિ ॥ ૧૫॥

માતાપિત્રોશ્ચ શુશ્રૂષા દેવતાતિથિપૂજનમ્ ।
ગુરુ પૂજા ઘૃણા શૌચં નિત્યમિન્દ્રિયસંયમઃ ॥ ૧૬॥

પ્રવર્તનં શુભાનાં ચ તત્સતાં વૃત્તમુચ્યતે ।
તતો ધર્મઃ પ્રભવતિ યઃ પ્રજાઃ પાતિ શાશ્વતીઃ ॥ ૧૭॥

એવં સત્સુ સદા પશ્યેત્તત્ર હ્યેષા ધ્રુવા સ્થિતિઃ ।
આચારો ધર્મમાચષ્ટે યસ્મિન્સન્તો વ્યવસ્થિતાઃ ॥ ૧૮॥

તેષુ તદ્ધર્મનિક્ષિપ્તં યઃ સ ધર્મઃ સનાતનઃ ।
યસ્તં સમભિપદ્યેત ન સ દુર્ગતિમાપ્નુયાત્ ॥ ૧૯॥

અતો નિયમ્યતે લોકઃ પ્રમુહ્ય ધર્મવર્ત્મસુ ।
યસ્તુ યોગી ચ મુક્તશ્ચ સ એતેભ્યો વિશિષ્યતે ॥ ૨૦॥

વર્તમાનસ્ય ધર્મેણ પુરુષસ્ય યથાતથા ।
સંસારતારણં હ્યસ્ય કાલેન મહતા ભવેત્ ॥ ૨૧॥

એવં પૂર્વકૃતં કર્મ સર્વો જન્તુર્નિષેવતે ।
સર્વં તત્કારણં યેન નિકૃતોઽયમિહાગતઃ ॥ ૨૨॥

શરીરગ્રહણં ચાસ્ય કેન પૂર્વં પ્રકલ્પિતમ્ ।
ઇત્યેવં સંશયો લોકે તચ્ચ વક્ષ્યામ્યતઃ પરમ્ ॥ ૨૩॥

શરીરમાત્મનઃ કૃત્વા સર્વભૂતપિતામહઃ ।
ત્રૈલોક્યમસૃજદ્બ્રહ્મા કૃત્સ્નં સ્થાવરજઙ્ગમમ્ ॥ ૨૪॥

તતઃ પ્રધાનમસૃજચ્ચેતના સા શરીરિણામ્ ।
યયા સર્વમિદં વ્યાપ્તં યાં લોકે પરમાં વિદુઃ ॥ ૨૫॥

ઇહ તત્ક્ષરમિત્યુક્તં પરં ત્વમૃતમક્ષરમ્ ।
ત્રયાણાં મિથુનં સર્વમેકૈકસ્ય પૃથક્પૃથક્ ॥ ૨૬॥

અસૃજત્સર્વભૂતાનિ પૂર્વસૃષ્ટઃ પ્રજાપતિઃ ।
સ્થાવરાણિ ચ ભૂતાનિ ઇત્યેષા પૌર્વિકી શ્રુતિઃ ॥ ૨૭॥

તસ્ય કાલપરીમાણમકરોત્સ પિતામહઃ ।
ભૂતેષુ પરિવૃત્તિં ચ પુનરાવૃત્તિમેવ ચ ॥ ૨૮॥

યથાત્ર કશ્ચિન્મેધાવી દૃષ્ટાત્મા પૂર્વજન્મનિ ।
યત્પ્રવક્ષ્યામિ તત્સર્વં યથાવદુપપદ્યતે ॥ ૨૯॥

સુખદુઃખે સદા સમ્યગનિત્યે યઃ પ્રપશ્યતિ ।
કાયં ચામેધ્યસઙ્ઘાતં વિનાશં કર્મ સંહિતમ્ ॥ ૩૦॥

યચ્ચ કિઞ્ચિત્સુખં તચ્ચ સર્વં દુઃખમિતિ સ્મરન્ ।
સંસારસાગરં ઘોરં તરિષ્યતિ સુદુસ્તરમ્ ॥ ૩૧॥

જનીમરણરોગૈશ્ચ સમાવિષ્ટઃ પ્રધાનવિત્ ।
ચેતનાવત્સુ ચૈતન્યં સમં ભૂતેષુ પશ્યતિ ॥ ૩૨॥

નિર્વિદ્યતે તતઃ કૃત્સ્નં માર્ગમાણઃ પરં પદમ્ ।
તસ્યોપદેશં વક્ષ્યામિ યાથાતથ્યેન સત્તમ ॥ ૩૩॥

શાશ્વતસ્યાવ્યયસ્યાથ પદસ્ય જ્ઞાનમુત્તમમ્ ।
પ્રોચ્યમાનં મયા વિપ્ર નિબોધેદમશેષતઃ ॥ ૩૪॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ એકોનવિંશોઽધ્યાયઃ ॥

## અધ્યાયઃ ૧૯

બ્રાહ્મણ ઉવાચ
યઃ સ્યાદેકાયને લીનસ્તૂષ્ણીં કિઞ્ચિદચિન્તયન્ ।
પૂર્વં પૂર્વં પરિત્યજ્ય સ નિરારમ્ભકો ભવેત્ ॥ ૧॥

સર્વમિત્રઃ સર્વસહઃ સમરક્તો જિતેન્દ્રિયઃ ।

વ્યપેતભયમન્યુશ્ચ કામહા મુચ્યતે નરઃ ॥ ૨॥

આત્મવત્સર્વભૂતેષુ યશ્ચરેન્નિયતઃ શુચિઃ ।
અમાની નિરભીમાનઃ સર્વતો મુક્ત એવ સઃ ॥ ૩॥

જીવિતં મરણં ચોભે સુખદુઃખે તથૈવ ચ ।
લાભાલાભે પ્રિય દ્વેષ્યે યઃ સમઃ સ ચ મુચ્યતે ॥ ૪॥

ન કસ્ય ચિત્સ્પૃહયતે નાવજાનાતિ કિઞ્ચન ।
નિર્દ્વન્દ્વો વીતરાગાત્મા સર્વતો મુક્ત એવ સઃ ॥ ૫॥

અનમિત્રોઽથ નિર્બન્ધુરનપત્યશ્ચ યઃ ક્વચિત્ ।
ત્યક્તધર્માર્થકામશ્ચ નિરાકાઙ્ક્ષી સ મુચ્યતે ॥ ૬॥

નૈવ ધર્મી ન ચાધર્મી પૂર્વોપચિતહા ચ યઃ ।
ધાતુક્ષયપ્રશાન્તાત્મા નિર્દ્વન્દ્વઃ સ વિમુચ્યતે ॥ ૭॥

અકર્મા ચાવિકાઙ્ક્ષશ્ચ પશ્યઞ્જગદશાશ્વતમ્ ।
અસ્વસ્થમવશં નિત્યં જન્મ સંસારમોહિતમ્ ॥ ૮॥

વૈરાગ્યબુદ્ધિઃ સતતં તાપદોષવ્યપેક્ષકઃ ।
આત્મબન્ધવિનિર્મોક્ષં સ કરોત્યચિરાદિવ ॥ ૯॥

અગન્ધરસમસ્પર્શમશબ્દમપરિગ્રહમ્ ।
અરૂપમનભિજ્ઞેયં દૃષ્ટ્વાઽઽત્માનં વિમુચ્યતે ॥ ૧૦॥

પઞ્ચ ભૂતગુણૈર્હીનમમૂર્તિમદલેપકમ્ ।
અગુણં ગુણભોક્તારં યઃ પશ્યતિ સ મુચ્યતે ॥ ૧૧॥

વિહાય સર્વસઙ્કલ્પાન્બુદ્ધ્યા શારીરમાનસાન્ ।
શનૈર્નિર્વાણમાપ્નોતિ નિરિન્ધન ઇવાનલઃ ॥ ૧૨॥

વિમુક્તઃ સર્વસંસ્કારૈસ્તતો બ્રહ્મ સનાતનમ્ ।
પરમાપ્નોતિ સંશાન્તમચલં દિવ્યમક્ષરમ્ ॥ ૧૩॥

અતઃ પરં પ્રવક્ષ્યામિ યોગશાસ્ત્રમનુત્તમમ્ ।
યજ્જ્ઞાત્વા સિદ્ધમાત્માનં લોકે પશ્યન્તિ યોગિનઃ ॥ ૧૪॥

તસ્યોપદેશં પશ્યામિ યથાવત્તન્નિબોધ મે ।
યૈર્દ્વારૈશ્ચારયન્નિત્યં પશ્યત્યાત્માનમાત્મનિ ॥ ૧૫॥

ઇન્દ્રિયાણિ તુ સંહૃત્ય મન આત્મનિ ધારયેત્ ।
તીવ્રં તપ્ત્વા તપઃ પૂર્વં તતો યોક્તુમુપક્રમેત્ ॥ ૧૬॥

તપસ્વી ત્યક્તસઙ્કલ્પો દમ્ભાહઙ્કારવર્જિતઃ ।
મનીષી મનસા વિપ્રઃ પશ્યત્યાત્માનમાત્મનિ ॥ ૧૭॥

સ ચેચ્છક્નોઽત્યયં સાધુર્યોક્તુમાત્માનમાત્મનિ ।
તત એકાન્તશીલઃ સ પશ્યત્યાત્માનમાત્મનિ ॥ ૧૮॥

સંયતઃ સતતં યુક્ત આત્મવાન્વિજિતેન્દ્રિયઃ ।
તથાયમાત્મનાઽઽત્માનં સાધુ યુક્તઃ પ્રપશ્યતિ ॥ ૧૯॥

યથા હિ પુરુષઃ સ્વપ્ને દૃષ્ટ્વા પશ્યત્યસાવિતિ ।
તથારૂપમિવાત્માનં સમ્પ્રયુક્તઃ પ્રપશ્યતિ ॥ ૨૦॥

ઇષીકાં વા યથા મુઞ્જાત્કશ્ચિન્નિર્હૃત્ય દર્શયેત્ ।
યોગી નિષ્કૃષ્ટમાત્માનં યથા સમ્પશ્યતે તનૌ ॥ ૨૧॥

મુઞ્જં શરીરં તસ્યાહુરિષીકામાત્મનિ શ્રિતામ્ ।
એતન્નિદર્શનં પ્રોક્તં યોગવિદ્ભિરનુત્તમમ્ ॥ ૨૨॥

યદા હિ યુક્તમાત્માનં સમ્યક્પશ્યતિ દેહભૃત્ ।
તદાસ્ય નેશતે કશ્ચિત્ત્રૈલોક્યસ્યાપિ યઃ પ્રભુઃ ॥ ૨૩॥

અન્યોન્યાશ્ચૈવ તનવો યથેષ્ટં પ્રતિપદ્યતે ।
વિનિવૃત્ય જરામૃત્યૂ ન હૃષ્યતિ ન શોચતિ ॥ ૨૪॥

દેવાનામપિ દેવત્વં યુક્તઃ કારયતે વશી ।
બ્રહ્મ ચાવ્યયમાપ્નોતિ હિત્વા દેહમશાશ્વતમ્ ॥ ૨૫॥

વિનશ્યત્સ્વપિ લોકેષુ ન ભયં તસ્ય જાયતે ।
ક્લિશ્યમાનેષુ ભૂતેષુ ન સ ક્લિશ્યતિ કેનચિત્ ॥ ૨૬॥

દુઃખશોકમયૈર્ઘોરૈઃ સઙ્ગસ્નેહ સમુદ્ભવૈઃ ।
ન વિચાલ્યેત યુક્તાત્મા નિસ્પૃહઃ શાન્તમાનસઃ ॥ ૨૭॥

નૈનં શસ્ત્રાણિ વિધ્યન્તે ન મૃત્યુશ્ચાસ્ય વિદ્યતે ।
નાતઃ સુખતરં કિં ચિલ્લોકે ક્વચન વિદ્યતે ॥ ૨૮॥

સમ્યગ્યુક્ત્વા યદાત્માનમાત્મન્યેવ પ્રપશ્યતિ ।
તદૈવ ન સ્પૃહયતે સાક્ષાદપિ શતક્રતોઃ ॥ ૨૯॥

નિર્વેદસ્તુ ન ગન્તવ્યો યુઞ્જાનેન કથઞ્ચન ।
યોગમેકાન્તશીલસ્તુ યથા યુઞ્જીત તચ્છૃણુ ॥ ૩૦॥

દૃષ્ટપૂર્વા દિશં ચિન્ત્ય યસ્મિન્સન્નિવસેત્પુરે ।
પુરસ્યાભ્યન્તરે તસ્ય મનશ્ચાયં ન બાહ્યતઃ ॥ ૩૧॥

પુરસ્યાભ્યન્તરે તિષ્ઠન્યસ્મિન્નાવસથે વસેત્ ।
તસ્મિન્નાવસથે ધાર્યં સ બાહ્યાભ્યન્તરં મનઃ ॥ ૩૨॥

પ્રચિન્ત્યાવસથં કૃત્સ્નં યસ્મિન્કાયેઽવતિષ્ઠતે ।
તસ્મિન્કાયે મનશ્ચાસ્ય ન કથઞ્ચન બાહ્યતઃ ॥ ૩૩॥

સન્નિયમ્યેન્દ્રિયગ્રામં નિર્ઘોષે નિર્જને વને ।
કાયમભ્યન્તરં કૃત્સ્નમેકાગ્રઃ પરિચિન્તયેત્ ॥ ૩૪॥

દન્તાંસ્તાલુ ચ જિહ્વાં ચ ગલં ગ્રીવાં તથૈવ ચ ।
હૃદયં ચિન્તયેચ્ચાપિ તથા હૃદયબન્ધનમ્ ॥ ૩૫॥

ઇત્યુક્તઃ સ મયા શિષ્યો મેધાવી મધુસૂદન ।
પપ્રચ્છ પુનરેવેમં મોક્ષધર્મં સુદુર્વચમ્ ॥ ૩૬॥

ભુક્તં ભુક્તં કથમિદમન્નં કોષ્ઠે વિપચ્યતે ।
કથં રસત્વં વ્રજતિ શોણિતં જાયતે કથમ્ ।
તથા માંસં ચ મેદશ્ચ સ્નાય્વસ્થીનિ ચ પોષતિ ॥ ૩૭॥

કથમેતાનિ સર્વાણિ શરીરાણિ શરીરિણામ્ ।
વર્ધન્તે વર્ધમાનસ્ય વર્ધતે ચ કથં બલમ્ ।
નિરોજસાં નિષ્ક્રમણં મલાનાં ચ પૃથક્પૃથક્ ॥ ૩૮॥

કુતો વાયં પ્રશ્વસિતિ ઉચ્છ્વસિત્યપિ વા પુનઃ ।
કં ચ દેશમધિષ્ઠાય તિષ્ઠત્યાત્માયમાત્મનિ ॥ ૩૯॥

જીવઃ કાયં વહતિ ચેચ્ચેષ્ટયાનઃ કલેવરમ્ ।
કિં વર્ણં કીદૃશં ચૈવ નિવેશયતિ વૈ મનઃ ।
યાથાતથ્યેન ભગવન્વક્તુમર્હસિ મેઽનઘ ॥ ૪૦॥

ઇતિ સમ્પરિપૃષ્ટોઽહં તેન વિપ્રેણ માધવ ।
પ્રત્યબ્રુવં મહાબાહો યથા શ્રુતમરિન્દમ ॥ ૪૧॥

યથા સ્વકોષ્ઠે પ્રક્ષિપ્ય કોષ્ઠં ભાણ્ડમના ભવેત્ ।
તથા સ્વકાયે પ્રક્ષિપ્ય મનો દ્વારૈરનિશ્ચલૈઃ ।
આત્માનં તત્ર માર્ગેત પ્રમાદં પરિવર્જયેત્ ॥ ૪૨ ॥

એવં સતતમુદ્યુક્તઃ પ્રીતાત્મા નચિરાદિવ ।
આસાદયતિ તદ્બ્રહ્મ યદ્દૃષ્ટ્વા સ્યાત્પ્રધાનવિત્ ॥ ૪૩ ॥

ન ત્વસૌ ચક્ષુષા ગ્રાહ્યો ન ચ સર્વૈરપીન્દ્રિયૈઃ ।
મનસૈવ પ્રદીપેન મહાનાત્મનિ દૃશ્યતે ॥ ૪૪ ॥

સર્વતઃ પાણિપાદં તં સર્વતોઽક્ષિશિરોમુખમ્ ।
જીવો નિષ્ક્રાન્તમાત્માનં શરીરાત્સમ્પ્રપશ્યતિ ॥ ૪૫ ॥

સ તદુત્સૃજ્ય દેહં સ્વં ધારયન્બ્રહ્મ કેવલમ્ ।
આત્માનમાલોકયતિ મનસા પ્રહસન્નિવ ॥ ૪૬ ॥

ઇદં સર્વરહસ્યં તે મયોક્તં દ્વિજસત્તમ ।
આપૃચ્છે સાધયિષ્યામિ ગચ્છ શિષ્ય યથાસુખમ્ ॥ ૪૭ ॥

ઇત્યુક્તઃ સ તદા કૃષ્ણ મયા શિષ્યો મહાતપાઃ ।
અગચ્છત યથાકામં બ્રાહ્મણશ્છિન્નસંશયઃ ॥ ૪૮ ॥

વાસુદેવ ઉવાચ
ઇત્યુક્ત્વા સ તદા વાક્યં માં પાર્થ દ્વિજપુઙ્ગવઃ ।
મોક્ષધર્માશ્રિતઃ સમ્યક્તત્રૈવાન્તરધીયત ॥ ૪૯ ॥

કચ્ચિદેતત્ત્વયા પાર્થ શ્રુતમેકાગ્રચેતસા ।
તદાપિ હિ રથસ્થસ્ત્વં શ્રુતવાનેતદેવ હિ ॥ ૫૦ ॥

નૈતત્પાર્થ સુવિજ્ઞેયં વ્યામિશ્રેણેતિ મે મતિઃ ।
નરેણાકૃતસંજ્ઞેન વિદગ્ધેનાકૃતાત્મના ॥ ૫૧ ॥

સુરહસ્યમિદં પ્રોક્તં દેવાનાં ભરતર્ષભ ।
કચ્ચિન્નેદં શ્રુતં પાર્થ મર્ત્યેનાન્યેન કેનચિત્ ॥ ૫૨ ॥

ન હ્યેતચ્છ્રોતુમર્હોઽન્યો મનુષ્યસ્ત્વામૃતેઽનઘ ।
નૈતદદ્ય સુવિજ્ઞેયં વ્યામિશ્રેણાન્તરાત્મના ॥ ૫૩ ॥

ક્રિયાવદ્ભિર્હિ કૌન્તેય દેવલોકઃ સમાવૃતઃ ।
ન ચૈતદિષ્ટં દેવાનાં મર્ત્યૈરુપરિ વર્તનમ્ ॥ ૫૪ ॥

પરા હિ સા ગતિઃ પાર્થ યત્તદ્બ્રહ્મ સનાતનમ્ ।
યત્રામૃતત્વં પ્રાપ્નોતિ ત્યક્ત્વા દુઃખં સદા સુખી ॥ ૫૫॥

એવં હિ ધર્મમાસ્થાય યેઽપિ સ્યુઃ પાપયોનયઃ ।
સ્ત્રિયો વૈશ્યાસ્તથા શૂદ્રાસ્તેઽપિ યાન્તિ પરાં ગતિમ્ ॥ ૫૬॥

કિં પુનર્બ્રાહ્મણાઃ પાર્થ ક્ષત્રિયા વા બહુશ્રુતાઃ ।
સ્વધર્મરતયો નિત્યં બ્રહ્મલોકપરાયણાઃ ॥ ૫૭॥

હેતુમચ્ચૈતદુદ્દિષ્ટમુપાયાશ્ચાસ્ય સાધને ।
સિદ્ધેઃ ફલં ચ મોક્ષશ્ચ દુઃખસ્ય ચ વિનિર્ણયઃ ।
અતઃ પરં સુખં ત્વન્યત્કિં નુ સ્યાદ્ભરતર્ષભ ॥ ૫૮॥

શ્રુતવાઞ્શ્રદ્દધાનશ્ચ પરાક્રાન્તશ્ચ પાણ્ડવ ।
યઃ પરિત્યજતે મર્ત્યો લોકતન્ત્રમસારવત્ ।
એતૈરુપાયૈઃ સ ક્ષિપ્રં પરાં ગતિમવાપ્નુયાત્ ॥ ૫૯॥

એતાવદેવ વક્તવ્યં નાતો ભૂયોઽસ્તિ કિઞ્ચન ।
ષણ્માસાન્નિત્યયુક્તસ્ય યોગઃ પાર્થ પ્રવર્તતે ॥ ૬૦॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ એકોનવિંષોઽધ્યાયઃ ॥

॥ ઇતિ અનુગીતા સમાપ્તા ॥

Mahabharata Ashvamedhika parva.

Proofread by Sunder Hattangadi, PSA Easwaran

*Anugita*

pdf was typeset on December 30, 2022

Please send corrections to *sanskrit@cheerful.com*